# उ० श्रीलब्धिमुनिविरचितम्

# नरमणि-मण्डित-भालस्थल युगप्रधान श्रीजिनचन्द्रसूरि चरितम्

[खरतर गच्छ में युगप्रधान श्रीजिनदत्तसूरिजी, उनके पट्टधर मणिधारी श्रीजिनचंद्रसूरिजी, प्रगट-प्रभावी श्री जिनकुशलसूरिजी और अकबर-प्रतिबोधक श्री जिनचन्द्रसूरिजी, ये चारों आचार्य दादाजी के नाम से विख्यात हैं, हमने जब साहित्य को शोध महोपाध्याय कविवर समयसुंदर संबन्धी विशेष जानकारी प्राप्त करने लिए प्रारंभ को तो उनके दादागुरू चतुर्थ दादा साहब सम्बन्धी विपुल समग्री हमारे सामने आई। हमने शताधिक ग्रन्थों के आधार से उनका स्वतन्त्र विस्तृत जीवनचरित्र 'युगप्रधान श्रीजिनचन्द्र सूरि' सं० १९९२ में प्रकाशित किया और उसके बाद क्रमशः दादा श्रीजिनकुशलसूरि, मणिधारी जिनचन्द्रसूरि के चरित्र प्रकाशत किये। जब वे परमपूज्य आशु-कवि उपाध्याय लब्धिमुनिजी को भेजे गये तो उन्होंने उनके आधार से चार संस्कृत काव्य निर्माण कर दिये। अकबर प्रतिबोधक जिनचन्द्रसूरि चरित काव्य ६ सर्गों में १२१२ पद्यों का है। सं०१९९२ के बैशाख सुदि ७ को भुजनगर में इसकी रचना हुई है। इसके बाद श्री जिनकुशलसूरि चरित्र ६३३ श्लोकों में सं० १९९६ मार्गशीर्ष शु १५ अहमदाबाद में पूर्ण किया। तदनंतर मणिधारी जिनचन्द्रसूरि चरित्र सं० १९९८ के अक्षयतृतीया को बंबई में रचा। अंतिम श्री जिन दत्तसूरि चरित्र ४६८ श्लोकों में सं० २००५ बैशाख सुदि ५ को जयपुर में पूर्ण किया। इन चारों संस्कृत काव्यों में से अकबर-प्रतिबोधक श्री जिनचन्द्रसूरि चरित्र दादागुरु के अनन्य भक्त को अभयचंदजी व श्री लक्ष्मीचन्दजी सेठ द्वारा प्रकाशित हो गया है। अभी अष्टम शताब्दी के प्रसंग से मणिधारीजी का चरित्र भी प्रकाशित करना अत्यावश्यक समझ कर उसे यहां दिया जा रहा है। —संपादक]

प्रणम्य श्रीमहावीरं चरितं लिख्यते मया।
मणिभृज्जिनचन्द्राख्य सूरीणां पुण्यशालिनाम् ॥ १ ॥

जैनसमाजे विख्याता दादेति नामधारकाः।
श्रीजिनदत्तसूरीशाः श्रीजिनचन्द्रसूरयः ॥२ ॥

जिनकुशलसूरीशाः श्रीजिनचन्द्रसूरयः।
श्रीखरतरगच्छस्य चतुर्ष्वेतेषु सूरिषु ॥ ३ ॥

श्रीजिनदत्तसूरीणां समागच्छत्यनन्तरम्।
श्रीजिनचन्द्रसूरीणा-मभिधा मणिधारिणाम् ॥४॥

त्रिभिर्विशेषकम्

ते महाप्रतिभाशालि-विद्वांसः सूरयोऽभवन्।
शुद्धज्ञान-क्रियायुक्ता जिनधर्मप्रभावकाः ॥ ५ ॥

एभिः सम्प्राप्य षड्विंशत्यब्दाल्पायुरकारयत्।
कार्यं तदस्ति चाश्चर्यजनकं गौरवान्वितम् ॥ ६ ॥

अज्ञायि गुरुवर्येण श्रीजिनदत्तसूरिणा।
प्रतिभादिपरीक्षातः स च महाप्रभावकः ॥ ७ ॥

दृश्यन्ते दत्तसूरीणां लोकोत्तरप्रभावकाः।
श्रीजिनचन्द्रसूरीश-जीवने चांकिता गुणाः ॥ ८ ॥

मणिधारी महान् व्यक्ति-रसाधारणसज्जनः।
अभूदतोऽस्य संक्षिप्त परिचयोऽत्र दीयते ॥ ९ ॥

जेसलमेरुदुर्गस्य सौष्ठवराज्यवर्त्तिनि।
श्रीविक्रमपुर द्रङ्गे चैत्य-श्राद्धजनाकुले ॥ १० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

उवास रासलश्रेष्ठी श्राद्धधर्मपरायणः ।
धर्मिष्ठा स्त्री गुणश्रेष्ठा तस्य देल्हणदे प्रिया ॥ ११ ॥
युग्मम्
तस्याः कुक्षेरभूदस्य शैलाङ्करुद्रवत्सरे ।
भाद्रशुक्लाष्टमी घस्रे ज्येष्ठायां जन्म सत्क्षणे ॥ १२ ॥
श्रीजिनदत्तसूरीणां श्रीविक्रमपुरे महान् ।
प्रभावः समभून्मार्याद्युपद्रव-निवारणात् ॥ १३ ॥
श्रीजिनदत्तसूरीशै र्वाग्जड़विषये पुनः ।
रचित्वा चर्चरीग्रन्थोऽपभ्रंश भाषया वरः ॥ १४ ॥
मेहर वासलादीनां विक्रमपुरवासिनाम् ।
श्राद्धानां पठनार्थं च प्रेषितो विक्रमे पुरे ॥१५॥ युग्मम्
ग्रन्थेन भावितस्तेन श्रावकः सह्नियात्मजः ।
देवधरः परित्यज्याम्नायं च चैत्यवासिनः ॥ १६ ॥
लात्वाऽऽगमेत्तः सूरीन् श्री विक्रमपुरे स्वयम् ।
अवीकरच्चतुर्मासीं प्रभूतादरपूर्वकम् ॥ १७ ॥ युग्मम् ॥
सुधामयोपदेशेन तेषां प्रभावशालिनाम् ।
बहवो भविनो जीवाः प्राप्ताः सद्बोधमत्र च ॥ १८ ॥
सर्वविरतयः केचिद्देशविरतयः पुनः ।
केचित्केचन सम्यत्व भृतो तत्राभवन् जनाः ॥ १९ ॥
माहेश्वरविणिग्-विप्र-क्षत्रियास्तत्र सूरिणा ।
प्रतिबोध्य कृताः शुद्धजैनधर्मानुयायिनः ॥ २० ॥
पुनः श्रीजिनदत्तसूरीशैस्तत्र भवाब्धितारिणी ।
महावीर प्रभोर्मूर्त्तिः स्थापिताऽभूज्जिनालये ॥ २१ ॥
मात्रा सहैकदा बालावस्थो रासलनन्दनः ।
सुगुरुं वन्दितुं पूज्याधिष्ठितोपाश्रयं ययौ ॥ २२ ॥
सूरिणालोक्य तं बालं शुभलक्षणलक्षितम् ।
प्रतिभाशालिनं ज्ञात्वा, स्वपदयोग्यभाविनम् ॥ २३ ॥
बहिः प्रकाशिता वार्त्ता सा तां श्रुत्वा निजात्मजः ।
जननीजनकाभ्यां हि गुरवे प्रत्यलाभि सः ॥२४॥ युग्मम्
श्री विक्रमपुरे कृत्वा बह्वीं धर्मप्रभावनाम् ।
युगप्रधानसूरीशा अजमेरुं समाययुः ॥ २५ ॥

तत्र संवद्गुणव्योमसूर्याब्दे फाल्गुनार्जुने ।
नवम्यां पार्श्वनाथस्य विधिचैत्ये महोत्सवात् ॥ २६ ॥
श्री जिनदत्तसूरीणां महाप्रभावशालिनाम् ।
शिष्यत्वेनाभवद् दीक्षा लात्वा रासलनन्दनः ॥ २७ ॥
सोऽसाधारणधीशाली स्मरणशक्तिसंयुतः ।
अल्पीयसापि कालेन विकसत्प्रतिभोऽभवत् ॥ २८ ॥
चक्रे लघुवयस्कस्य सरस्वतीसुतस्य च ।
मेधा श्लाघा मुनेरस्य सर्वैर्जनैः प्रहर्षितैः ॥ २९ ॥
सूरेरपि परीक्षायाः श्लाघां चक्रुर्जना अथ ।
श्री विक्रमपुरे संवद्बाण-ख-सूर्य-वत्सरे ॥ ३० ॥
वैशाखे शुक्लषष्ठ्यां च महावीरजिनालये ।
स जिनचन्द्रसूरीशः स्वपदे स्थापितो मुनिः ॥३१॥युग्मम्
श्रीजिनचन्द्रसूरीति नाम्ना ख्यातिं गतः स च ।
अस्य पित्रा महायुक्त्या सूरिपदोत्सवः कृतः ॥ ३२ ॥
श्री जिनचन्द्रसूरीशे ललाट-मणिधारिणि ।
श्रीजिनदत्तसूरीणामभवन्महती कृपा ॥ ३३ ॥
यतो यैश्च स्वयं ज्योति र्मन्त्र-तन्त्रागमादिकान् ।
साम्नायान् पाठयित्वाऽयं महाविशारदः कृतः ॥ ३४ ॥
सूरीशजिनचन्द्रोऽपि क्षमावान् विनयी गुणी ।
सर्वदा गुरुसेवायां दत्तचित्तश्च तस्थिवान् ॥३५॥
अस्य विनयिशिष्यस्याकृत्रिमभक्तिसेवया ।
आसन्नतिप्रसन्ना हि श्रीजिनदत्तसूरयः ॥ ३६ ॥
स्व-परोन्नतिकृद्गच्छ-सञ्चालनादिकाः पुनः ।
अस्मै श्रीदत्तसूरीशैर्दत्ता शिक्षा अनेकशः ॥ ३७ ॥
ता सुमहत्त्वसंयुक्ताऽसीच्छिक्षैका वदामहे ।
वयं यतो गुरोः सेवा-मूल्यलाभो हि विद्यते ॥ ३८ ॥
सा शिक्षेयं कदापि त्वं मा गमो योगिनीपुरम् ।
तत्र ते गमने भावी मृत्यु दुंष्ट सुरीच्छलात् ॥ ३९ ॥
यतस्तत्र क्षणे तस्मिन् दुष्टानामभवन्महान् ।
योगिनीवीरवेतालादि देवानामुपद्रवः ॥ ४० ॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

सूरीशो भाविसङ्केत-भावार्थोयमभूद्यतः ।
सम्बन्धेस्मिन्नयं तिष्ठेत्सावधानतया स्वयम् ॥ ४१ ॥
रुद्र-सूर्य-समाषाढ-धवलैकादशीतिथौ ।
अजमेरे गताः स्वर्गं श्रीजिनदत्तसूरयः ॥ ४२ ॥
ततश्चन्द्रगुरौ सर्व-गच्छभारः समागतः ।
निरवहद्यथार्थेन पदमिदमसावपि ॥ ४३ ॥
पावयन्तः पुरग्रामान् श्रीजिनचन्द्रसूरयः ।
सम्बद्वेदेन्दुसूर्याब्दे त्रिभुवनगिरिं ययुः ॥ ४४ ॥
तत्रत्य शान्तिनाथस्य विधिचैत्ये प्रतिष्ठिते ।
श्रीजिनदत्तसूरीशैः श्रीजिनचन्द्रसूरिणा ॥ ४५ ॥
स्वर्णमय ध्वजा दण्ड-कुम्भाः प्रतिष्ठिताः पुनः ।
प्रदत्तं गणिनी हेम-देव्यै प्रवर्त्तिनीपदम् ॥ ४६ ॥ युग्मम्
ततस्ते मथुरायात्रां कृत्वा गुर्भीमपल्लिकाम् ।
तत्र सम्वन्नगेलाक्षीन्दुवर्षे फाल्गुनार्जुने ॥ ४७ ॥
दशम्यां हि महावीरचैत्ये श्रीचन्द्रसूरिणा ।
पूर्णदेव गणी वीरभद्रो जिनरथः पुनः ॥ ४८ ॥
वीरनयो जयशीलो जिनभद्रो जगहितः ।
श्रीनरपतिरेतेष्टौ दीक्षिता मुनयो वराः ॥ ४९ ॥
त्रिभिर्विशेषकम्
श्राद्ध-क्षेमन्धरश्रेष्ठी पुनस्तैः प्रतिबोधितः ।
ततो विहृत्य सूरीशा मरुकोटं ययुः क्रमात् ॥ ५० ॥
तत्र चन्द्रप्रभस्वामिचैत्ये पूज्यैः प्रतिष्ठिताः ।
स्वर्णदण्डध्वजा कुम्भाः साधुगोलककारिताः ५१ ॥
उत्सवेऽस्मिन्लली मालां रौप्यपञ्चशताऽर्पणात् ।
श्रेष्ठिक्षेमन्धरोथार्यास्तत उच्चपुरं गताः ॥ ५२ ॥
तत्र सम्वद्गजेलाक्षीन्दुवर्षे गुणवर्द्धनः ।
ऋषभदत्त-विनयशीलादि मुनयो वराः ॥ ५३ ॥
सरस्वती गुणश्रीश्च जगश्रीरार्यिकाः पुनः ।
दीक्षिताः सूरिभिश्चैव मन्येऽपि बहवः क्रमात् ॥ ५४ ॥
युग्मम्
सम्वच्चन्द्रकराक्षीन्दु वर्षे श्री चन्द्रसूरिणा ।
सागरपाड़ा सद्ग्रामे पार्श्वनाथजिनालये ॥ ५५ ॥
श्री देवकुलिकाः श्रेष्ठिगयधर विधापिताः ।
प्रतिष्ठितास्ततः पूज्या अजमेरुं समागताः ॥५६॥ युग्मम्
तत्र स्तूपं प्रतिष्ठाप्य श्रीजिनदत्तसद्गुरोः ।
ततो विहृत्य सूरीशा बब्बेरकपुरं ययुः ॥ ५७ ॥
तत्र तैर्दीक्षिता गुण-भद्रा-भयेन्दुवाचकाः ।
यशश्चन्द्र-यशोभद्रो देवभद्रश्च तत्प्रिया ॥ ५८ ॥
ततः श्रीआशिकापुर्यां नागदत्ताय साधवे ।
अदायि वाचनाचार्यपदं श्रीचन्द्रसूरिणा ॥ ५९ ॥
ततो महावनस्थाने श्रीजिनचन्द्रसूरिणा ।
अजितजिननाथस्य विधिचैत्यं प्रतिष्ठितम् ॥ ६० ॥
तत इन्द्रपुरे पूज्यैः शान्तिनाथजिनालये ।
स्वर्णमयध्वजा दण्ड-कुम्भाः प्रतिष्ठिताः पुनः ॥ ६१ ॥
तगलायां ततः पूज्यैरजितनाथमन्दिरम् ।
गुणचन्द्रमुनेः पितृमङ्लाल विनिर्मितम् ॥ ६२ ॥
पुनः कराक्षिनेत्रेन्दुवत्सरे वादलीपुरे ।
तेनैव कारिताः श्रीमत्पार्श्वनाथजिनालये ॥ ६३ ॥
स्वर्णमयध्वजा दण्डकुम्भा अम्बासुरी गृहे ।
स्वर्णकुम्भध्वजा दण्डाः प्रत्यस्थापि महोत्सवात् ॥६४॥
त्रिभिर्विशेषकम्
ततः सुखेन सूरीशा विहरन्तः पुरादिषु ।
रुद्रपल्लीं गता जग्मु र्नरपालपुरं ततः ॥ ६५ ॥
तत्र गुरुं पराजेतुं ज्योतिर्विदेकपण्डितः ।
अभिमान्यकरोत् ज्योतिश्चर्चां श्रीगुरुणा समम् ॥६६॥
चरस्थिरादिलग्नेषु प्रभावो दर्श्यतां त्वया ।
एक लग्नस्य कस्यापोति पृष्टः सच सूरिणा ॥ ६७ ॥
तस्मिन्निरुत्तरीभूते वृषलग्नस्य सूरिणा ।
अन्तिमैकादशांशेषु मार्गशीर्षमुहूर्त्तके ॥ ६८ ॥
श्रीपार्श्वनाथ चैत्याग्रे शिलैषा स्थास्यति स्थिरा ।
यावदङ्गमुनीलाब्दं, प्रतिज्ञायेति तत्पुरः ॥ ६९ ॥
संस्थाप्यतां शिलां कुद्धां विप्रो नीतः पराजयम् ।
स्वस्थानं स गतः पूज्या रुद्रपल्लीं गतास्ततः ॥ ७० ॥
त्रिभिर्विशेषकम्

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चैत्यवासिपद्मचन्द्र-सूरिणा हीर्ष्ययाऽन्यदा ।
संगच्छन्तो बहिर्भूमिं स्वाश्रयासन्नमार्गतः ॥ ७१ ।
लघुवयस्कसूरीशाः समुनयो विलोकिताः ।
वः मुखशातिरस्तीति पृष्टास्ते जगुरोमिति ॥ ७२ ॥
पुनः पृष्टो गुरुः पद्म-सूरिणा भवताऽधुना ।
केषां केषां च शास्त्राणामध्ययनं विधीयते ॥ ७३ ॥
तत् श्रुत्वा मुनिना प्रोक्तमेकेन पार्श्ववर्तिना ।
अधीयन्तेऽधुनास्माकं सूरयो न्यायकन्दलीम् ॥ ७४ ॥
पुनः पृष्टो गुरुश्चैत्यस्थ पद्मचन्द्रसूरिणा ।
ईर्षालुना तमोवादो भवता पठितो न वा ॥ ७५ ॥
गुरुः प्राह तमोवादग्रन्थो विलोकितो मया ।
सोऽवग् त्वया समीचीनं तन्मननं कृतं न वा ॥ ७६ ॥
गुरु प्राह समीचीनं तत्कृतं सोऽवदत्पुनः ।
स्वरूपं कीदृशं तस्य रूप्यरूपि तमोस्ति वा ॥ ७७ ॥
पूज्योऽवक् तत्स्वरूपं च कीदृशमपि विद्यताम् ।
अधुना नास्ति तद्वाद-विवादकरणक्षणः ॥ ७८ ॥
विवादग्रस्तवस्तूनां निर्णयो राजपर्षदि ।
विद्वच्छिष्टजनाध्यक्षमेव भवितुमर्हति ॥ ७९ ॥
प्रमाण-नय-निक्षेपैः स्व-स्वपक्षसमर्थनम् ।
कृत्वा वस्तुस्वरूपस्य विचारः क्रियते बुधैः ॥ ८० ॥
निश्चितोऽयं हि यत् स्वीयपक्षे संस्थापितेऽपि च ।
द्रव्यं स्वस्य स्वरूपंच नैव त्यजति कर्हिचित् ॥ ८१ ॥
प्रोक्तं तेन पुनः स्वीयपक्षस्थापनमात्रतः ।
गुणपर्यायियुग् द्रव्यं स्व-स्वरूपं त्यजेन्न वा ॥ ८२ ॥
प्रोक्तं सर्वैस्तमो द्रव्यं तदस्ति सर्वसम्मतम् ।
पूज्योऽवादीत्तमो द्रव्यं विद्वान्नाङ्गीकरोति कः ॥ ८३ ॥
वार्त्तालापक्षणे तस्मिन् श्रीजिनचन्द्रसूरिणा ।
शिष्टता नम्रता शान्तिः प्रदर्शिता यथा यथा ॥८४ ॥
प्रकम्पितशरीरस्कः कोपातिरक्तलोचनः ।
पद्मचन्द्रोऽभिमानेनोन्मत्तोऽजनि तथा तथा ॥ ८५ ॥

तेनोक्तं च तमो द्रव्यमस्तीति न्यायरीतितः ।
यदाऽहं स्थापयिष्ये किं मदग्रे स्थास्यसे तदा ॥ ८६ ॥
गुरुः प्राह तमस्तीति योग्यता कस्य कस्य न ।
स्वतएव क्षणायाते ज्ञास्यथ राजपर्षदि ॥ ८७ ॥
पशुप्रायाटवीरेव रणभूरस्त्यवेत्य च ।
मां लघुवयसं शक्ति नैंधनीयाधिका त्वया ॥ ८८ ॥
यूयं जानीथ सिंहस्य लघुदेहवतो रवं ।
तीक्ष्णं निशम्य त्रस्यन्ति नगाकृतिगजा अपि ॥ ८९ ॥
तदाऽनयो र्द्वयोः सूर्योः श्रुत्वा वाद-विवादकम् ।
तत्र च कौतुकं द्रष्टुमनेके मिलिता जनाः ॥ ९० ॥
लात्वा निजगुरोः पक्षं श्रावकाः पक्षयोर्द्वयोः ।
महान्तं दर्शयामासुरहंकारं परस्परम् ॥ ९१ ॥
अन्ते राजसभायां तच्छास्त्रार्थो निश्चितोऽजनि ।
तच्छास्त्रार्थः समारब्धो निर्णीतसमये पुनः ॥ ९२ ॥
तत्र श्रीचन्द्रसूरीशैर्नय-प्रमाण-युक्तिभिः ।
विद्वत्तया समं स्वीय पक्षसमर्थनं कृतम् ॥ ९३ ॥
प्राप्तो निरुत्तरीभूतः पद्मसूरिः पराजयम् ।
ततः श्रीगुरुवे सभ्यैर्जयपत्रं समर्पितम् ॥ ९४ ॥
विद्वज्जनैः समं पूज्यः स्वस्थानमाययौ गुरोः
समन्तादखिलस्थाने प्रस्फुटितो जयध्वनिः ॥९५॥
प्रशंसाऽजनि सर्वत्र गुरोः सुविहिताध्वनः ।
तन्निमित्तं कृतः श्राद्धैरष्टाह्निकोत्सवो मुदा ॥९६॥
तर्कहट्टाख्यया पद्मसूरिश्राद्धा जने पुनः ।
गुरु श्राद्धागताः ख्यातिं जयतिहट्टसंज्ञया ॥९७॥
ततः पूज्याः सुसार्थेन समं चेलुः क्रमाच्चलन् ।
चोरसिदान सद्ग्रामोसन्नमुत्तरितः सच ॥९८॥
म्लेच्छागमनमाकर्ण्य तत्र तस्मिन् क्षणेऽजनि ।
सर्वः सार्थो भयभ्रान्तो नष्टुं लग्न इतस्ततः ॥९९॥
सार्थं तथाविधं दृट्वा स पृष्टो गुरुणां जगौ ।
भगवन् दृश्यतामत्रागच्छन्ति म्लेच्छसैनिकाः १००॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

समुच्छलति दिश्यस्यां धूलिः कोलाहलोपि च।
तेषां संश्रूयते सावधानी भूयावदद्गुरुः ॥१०१॥
भो भव्या धैर्यमाधायैकत्र विधीयतां निजम्
शकट बृषभाश्चौष्ट्रा खरक्रियाणकादिकम् ॥१०२॥
श्रीजिनदत्तसूरीन्द्रो युष्मद्भद्रं करिष्यति।
तैरपि सुगुरूक्तं तत्सर्वं शीघ्रतया कृतम् ॥१०३॥
प्रच्छन्नीभूय सार्थो स्थात्ततश्चाकर्षि सूरिणा।
मन्त्रितनिजदण्डेन रेखा सार्थं समंततः ॥१०४॥
सार्थजनैः स्वपार्श्वेन निर्यान्तो म्लेच्छ सैनिकाः।
अश्वस्थिताः कृपाहीनाः सहस्रशो विलोकिताः ॥१०५॥
परन्तु सैनिकैर्म्लेच्छैः सार्थो नादर्शि किन्तु ते।
प्राकारमेव पश्यन्तो दुष्टा दूरतरं गताः ॥१०६॥
सार्थजनोऽखिलो जातो निर्भयश्चलितस्ततः।
सयोगिनी पुरासन्नं किंचिद् ग्रामं समागतः ॥१०७॥
ज्ञात्वासन्नागतान् सूरीन्नन्तुं दिल्लीनिवासिनः।
ठक्कुर लोहट श्रेष्ठि महिचन्द्रकुलेन्दवः ॥१०८॥
सा पाल्हणादयश्राद्धाः संघमुख्या महर्द्धिकाः।
चेलू रथादिमारूढाः स्वपरिवार संयुताः ॥१०९॥युग्मम्
महायुक्त्या महाभूत्या विनिर्यातः पुराद्बहिः।
प्रासादस्थो जनान् दृष्ट्वा मदनपालभूपतिः ॥११०॥
अहमहमिकाः श्रेष्ठलोका अमो पुराद्बहिः।
कथं यान्तीति पप्रच्छ स्वप्रधान नियोगिनः॥१११॥
युग्मम् ॥
तैरधिकारिभिः प्रोक्तं राजन्नीतिविशारदाः।
अत्यन्तसुन्दराकारा अनेकशक्तिसंयुताः ॥११२॥
आयान्ति गुरवोऽमीषां श्रीजिनचन्द्रसूरयः।
ते तान् वन्दितुं यान्ति भक्तिवासितमानसाः ॥११३॥
युग्मम्॥
कुतुहलवशाद्राज्ञो मनसि गुरुदर्शनम्।
कर्तुं जागरितोत्कण्ठा ज्ञापयत्सोधिकारिणः ॥११४॥
आनीयतां च पट्टाश्व उद्घोष्यतां पुरे यथा।
पंचलेयुर्मया सार्द्धं, राज्याधिकारिणो लघु ॥११५॥

राजाज्ञां प्राप्य चारुह्य तुरङ्गमान् सहस्रशः।
नियोगिनोऽभवन्पृष्ठे, मदनपालभूपतेः ॥११६॥
श्राद्धेभ्यः पूर्वमेवागात्ससैन्यौ भूपतिर्गुरोः।
पार्श्वं सन्मानितः सार्थलोकेन वस्तुढौकनात् ॥११७॥
सूरिणाप्यर्पिता तस्मा अमृतमयदेशना।
देशनान्ते नृपेणाऽपि पृष्टाः श्रीचन्द्रसूरयः ॥११८॥
पूज्याः स्थानात्कुतो जातं वः शुभागमनं गुरुः।
प्राह साम्प्रतमायामो रुद्रपल्लीपुराद्वयम् ॥११९॥
नृपेणावादि हे पूज्या उत्थीयतां प्रचल्यताम्।
भवद्भिश्चरणन्यासैः पवित्रीक्रियतां पुरीम् ॥१२०॥
पूज्यैः स्मृत्वा गुरोः शिक्षां किमपि नैव जल्पितम्।
मौनं दृष्ट्वा वदद्भूपः पूज्यैर्मौनं कथं धृतम् ॥१२१॥
किंवास्त्यस्मत्पुरे कोपि प्रतिपक्षी जनोऽथवा।
प्राशुकाहारपानीय-वस्त्रादिवस्तु दुर्लभः ॥१२२॥
कोस्ति हेतुर्यतः पूज्यैस्त्यक्ता मार्गागतं पुरम्।
गम्यतेऽन्यत्र पूज्यो वग् धर्मक्षेत्रं भवत्पुरम् ॥१२३॥
तर्हि ममानुरोधेनोत्थीयतां योगिनीपुरे।
शीघ्रं प्रचल्यतां तत्र सर्वभव्यं भविष्यति ॥१२४॥
विश्वस्यतां भवद्भिर्मत्पुरे कोपि करिष्यति।
नापमानं पुनर्नोङ्गलीमप्युत्थापयिष्यति ॥१२५॥
पूज्यो राजानुरोधेन शिक्षामुल्लङ्घयन् गुरोः।
भवितव्यतयोदासीनतया तत्पुरं ययौ ॥१२६॥
सूरीश्वरप्रवेशस्य महोत्सवेऽखिलं पुरम्।
शृङ्गारितं च सद्वस्त्रपताकातोरणादिभिः ॥१२७॥
प्रणेदुः सर्ववाद्यानि भट्टाद्या विरुदावलिम्।
लोका जगुर्जगुर्भद्रगीतानि सधवास्त्रियः ॥१२८॥
स्थाने स्थानेऽभवन्नृत्यं स्थाने स्थाने स्त्रियः पुनः।
स्वस्तिकादीनि चक्रुः सन्मुक्ताफलाक्षतादिभिः॥१२९॥
लक्षशो मनुजा पारसङ्कीर्णत्वेन भूपतिः।
अचालीत्सूरिसेवायां सार्थे प्रमुदितो भृशम् ॥१३०॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

प्रवेशोत्सवदृश्योयं लोकहृदयचक्षुषाम् ।
सम्पूर्णानन्ददायीचातभूत्पूर्वो भवत्पुरे ॥१३१॥
सूरिराजे समायाते योगिनीपुरवासिषु ।
नवजीवनसञ्चारो लग्नो भवितुमद्भुतः ॥१३२॥
अनेकलोकसन्तप्ता आत्मनः शान्तिलाभकम् ।
लातुं लग्नाश्च सूरीशदेशनामृतधारया ॥१३३॥
मदनपालभूपोऽपि, दर्शनार्थमनेकशः ।
आगत्य सूरिराजोपदेशलाभं गृहीतवान् ॥१३४॥
द्वितीयाचन्द्रवद्राज्ञो धर्मरागो दिने दिने ।
ववृधे प्रत्यहं धर्मभावना च जनेष्वपि ॥१३५॥
स्वान्यकल्याणनिष्ठस्य तिष्ठतो योगिनीपुरे ।
श्रीजिनचन्द्रसूरेश्च कियन्तो वासरा गताः ॥१३६॥
एकस्मिन्वासरे दृष्ट्वा धनाभावेन दुर्बलम् ।
स्वभक्तं कुलचन्द्राख्यं श्राद्धं दयालुसूरिणा ॥१३७॥
लिखितमष्टगन्धेन यन्त्रं वितीर्य जल्पितम् ।
मुष्टीप्रमाणवासेन पूजनीयं त्वानिशम् ॥१३८॥
यन्त्रपट्टस्य निर्माल्य-वासक्षेपश्च मिश्रितः ।
पारदादिप्रयोगेण सौवर्णं च भविष्यति ॥१३९।
त्रिभिर्विशेषकम् ॥
कुलचन्द्रोपि पूज्योक्त-विध्यनुसारतोऽनिशम् ।
कुर्वाणस्तद्विधिं स्वल्पकालेन धनवानभूत् ॥१४०॥
एकस्मिन्वासरे पूज्या दिल्ल्युत्तरीयद्वारतः
बहिर्भूमिं च गच्छन्तो भवन्स्वमुनिभिः समम् ॥१४१॥
नवराज्यन्तिमाश्विन-धवलनवमीदिने ।
तदभूद्यत्र मार्यन्तेऽनेके जीवा नराधमैः ॥१४२॥
सूरिणा गच्छता मार्गे मांसार्थं कलहं मिथः ।
कुर्वाणौ द्वौ सुरौ दृष्टौ मिथ्यात्वमतिमोहितौ ॥१४३॥
दयालुहृदयाचार्यैरेकोमध्यात्तयोर्द्वयोः ।
अतिबलामिधौ देवो मिथ्यात्वी प्रतिबोधितः ॥१४४॥
सोऽपि भूत्वोपशान्तौवग् भवद्देशनया मया ।
मांसबलिः परित्यक्तो दारुणदुःखदायकः ॥१४५॥

परन्त्वनुग्रहं कृत्वा निवासार्थं प्रदर्श्यताम् ।
स्थानं मे निवसन् यत्र त्वदाज्ञां पालयाम्यहम् ॥१४६॥
पार्श्वनाथविधिचैत्ये द्वारसमीपवर्त्तिनि ।
गत्वा त्वं दक्षिणस्तम्भे वसेति गुरुणाऽकथि ॥१४७॥
एवं देयं समाश्वास्योपाश्रयमेत्य सूरिणा ।
लोहडादिस्वभक्तेभ्यः श्राद्धेभ्योऽश्राविसा कथा ॥१४८॥
पुनः पार्श्वेश चैत्यस्य स्तम्भे च दक्षिण स्थिते ।
अधिष्ठातृसुरा कृत्युत्कीर्णार्थं सूचना कृता ॥१४९॥
तथैवाकारि तैः श्राद्धैर्गुरुणा स प्रतिष्ठितः ।
अतिविस्तरतस्तस्यातिबलाख्या कृता पुनः ॥१५०॥
श्राद्धास्तद्पूजनं चक्रुः स्वादिष्टखाद्यवस्तुभिः ।
स सुरः पूरयामास तन्मनःकामनां सदा ॥१५१॥
एवं सर्वत्र कुर्वाणा जैनधर्मप्रभावनाम् ।
श्रीजिनचन्द्रसूरीशा ललाटमणिधारकाः ॥१५२॥
निजायुर्निकटं ज्ञात्वा गुणाक्षिरविवत्सरे ।
द्वितीयभाद्रपत्कृष्णचतुर्दशीतिथौ पुनः ॥१५३॥
चतुर्विधेन संघेन सार्द्धं विधाय क्षामणाम् ।
प्रान्ते चानशनं कृत्वा समाधिना दिवं ययुः ॥१५४॥
मृत्युः पट्टावलिष्वेषां बभूव योगिनीच्छलात् ।
प्रान्ते भविष्यवाग्युक्ता श्राद्धाध्यक्षं च सूरिणा ॥१५५॥
अस्माकं देहसंस्कारं यावद्दूरं करिष्यथ ।
सविभूतिपुरं तावद् दूरं वर्द्धिष्यते खलु ॥१५६॥
ततः श्राद्धा महायुक्त्याऽनेकमण्डपराजिते
पूतं संस्थाप्य निर्याणविमाने सुगुरोस्तनुम् ॥१५७॥
पुराद्दूरतरं नीत्वा सद्वस्तूच्छालनादिभिः ।
चक्रुरन्तक्रियां सारचन्दनादिकवस्तुभिः ॥१५८॥
तत्स्थानं विद्यतेऽद्यापि "बड़ेदादाजी" संज्ञया ।
स साधुरथ कुर्वाणो-न्तिमपवित्रदर्शनम् ॥१५९॥
अधीरमानसः कुर्वन्नश्रुपातं शुचाकुलः ।
गुणचन्द्रगणीसूरेरित्थं चकार संस्तवम् ॥१६०॥ युग्मम्॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

चातुर्वर्ण्यमिदं मुदा प्रयतते तद्रूपमालोकितुं ।
मादृक्षाश्च महर्षयस्तव वचः कर्तुं सदैवोद्यताः ।
शक्रोऽपि स्वयमेव देवसहितो युष्मत्प्रभामीहते
तत्किं श्रीजिनचन्द्रसूरिसुगुरो स्वर्गं प्रति प्रस्थितः । १॥
साहित्यं च निरर्थकं समभवन्निर्लक्षणं लक्षणम्
मन्त्रैर्मन्त्रपरैरभूयत तथा कैवल्यमेवाश्रितम्
कैवल्या जिनचन्द्रसूरिवर ते स्वर्गाधिरोहे हहा !!
सिद्धान्तः सुकरिष्यते किमपि यत्तन्नैव जानीमहे॥२॥
प्रमाणिकैराधुनिकैर्विधेयः प्रमाणमार्गः स्फुटमप्रमाणः ।
हहा ! महाकष्टमुपस्थितं ते स्वर्गाधिरोहे जिनचन्द्रसूरेः ॥३॥

पूज्यस्नेहवशाचक्रुरन्येपि साधवः पुनः ।
मिथःपराङ्मुखीभूयाश्रुपातं शोकविह्वलाः ॥१६१॥
उपस्थिताः पुनः श्राद्धा अपि वस्त्राञ्चलेन च ।
समाच्छाद्य स्वनेत्राणि चक्रुर्गद्गदरोदनम् ॥१६२॥
समयेऽस्मिन् सामायातः शोकसिन्धुः समंततः ।
कस्य कापि कथा नाभूत्सुगुरुविरहं विना ॥१६३॥
सुनिश्चितमिदं दृश्यमपरे दर्शका अपि ।
नेष्टं दृष्ट्वाऽभवन् रोद्धुं निजहृदयमक्षमाः ॥१६४॥
गुणचन्द्रगणी दृष्ट्वेमामसमंजसां दशाम् ।
कियन्तं समयं पश्चाद्धैर्यं धृत्वा मुनीनवग् ॥१६५॥
भवन्तः स्वात्मनः शान्तिं सत्वशालिसुसाधवः ।
यच्छन्तु गमितं रत्नं महार्घं दुर्लभं च यत् । १६६॥
लक्षोपायविधानेऽपि, हस्ते तन्न चटिष्यति ।
प्रान्ते मे गुरुणाऽवश्यकर्त्तव्यसूचनं कृतम् ॥१६७॥
करिष्याम्येवमेवाहं तेषामाज्ञानुसारतः ।
सर्वेषां भवतां येन, सुसन्तोषो भविष्यति ॥१६८॥
अधुना चल्यता मागम्यतां मया समंवरैः
भवद्भिर्मुनिभिः शीघ्रं सर्वं भव्यं भविष्यति ॥१६९॥
क्षणेऽस्मिन् दाहसंस्कारः सत्काखिलक्रियां गणी ।
समाप्योपाश्रयं विद्वान् मुनिभिः सममागतः ॥१७०॥

तत्र स्थित्वा गणी कञ्चित्कालं ततो विहृत्य च ।
चतुर्विधेन संघेन सार्द्धं बब्बेरकं ययौ ॥१७१॥
श्रीजिनचन्द्रसूरीणामाज्ञाया अनुसारतः ।
गुणचन्द्रगणी तत्र सर्वमान्यो महोत्सवात् ॥१७२॥
श्रीजिनदत्तसूरीणां वृद्धशिष्येण धीमता ।
दापयित्वा पदं सूरेः श्रीजयदेवसूरिणा ॥१७३॥
श्रीजिनपतिसूरीश इत्यभिधानपूर्वकम् ।
स्थापयामास तत्पट्टे नरपतिं मुनीश्वरम् ॥१७४॥
त्रिभिर्विशेषकम् ॥

नूतनसूरिपितृव्य-मानदेवो ऽकरोन्महे ।
सार्द्धमत्रत्यसंघेन, सहस्त्रौप्यकं व्ययम् ॥१७५॥
देशान्तरीयसंघेना-पि मिलित्वा महोत्सवे ।
बहुद्रव्यव्ययं कृत्वा स्वजन्म सफलीकृतम् ॥१७६॥
क्षणेऽस्मिन् वाचनाचार्य-जिनभद्रोप्यलंकृतः ।
श्रीजिनचन्द्रसूरीश-शिष्यः सूरिपदेन हि ॥१७७॥
पाठकजिनपालेन कृताया अनुसारतः ।
गुर्वावलेर्मयाऽलेखि, चरित्रं मणिधारिणाम् ॥१७८॥
कियानन्योपि वृत्तान्तः पट्टावलिषु दृश्यते ।
अन्यास्तु चन्द्रसूरीणां स्वल्पः सोप्यत्र कथ्यते ॥१७९॥
चन्द्रसूरिललाटेऽभून्मणिश्च तेन हेतुना ।
प्रसिद्धिस्तस्य लोकेऽभून्मणिधार्यभिधानतः ॥१८०॥
प्रोक्त एतस्य सम्बन्ध इत्थं पट्टावलौ मणेः ।
निजान्तसमयेऽवादि श्राद्धेभ्यश्चन्द्रसूरिणा ॥१८१॥
युष्माभिरग्निसंस्कार-समयात्पूर्वमेव हि ।
स्थापनीयं च मद्देहनिकषा दुग्धभाजनम् ॥१८२॥
ततो मणिः स निर्गत्यायास्यति दुग्धभाजने ।
सुगुरुविरहात् श्राद्धैस्तत्करणं तु विस्मृतम् ॥१८३॥
भवितव्यवशाद्योगि-हस्ते स चटितो मणिः ।
पूर्वोक्तविधिना लात्वा तं योगी प्रययौ मणिम् ॥१८४॥
प्रतिष्ठाप्यार्हतोमूर्तिं स्तम्भितां तेन योगिना ।
अन्यदा योगितः प्राप्तः स मणिः पतिसूरीणा ॥१८५॥

Jain Education International For Private & Personal Use Only www.jainelibrary.org

श्रीजिनचन्द्रसूरीशा ललाटमणिधारकाः ।
शासनोद्योतका आसन् महाप्रभावशालिनः ॥१८६॥
अतः खरतरे गच्छे चतुर्थपट्टधारिणाम् ।
तन्नाम स्थापनायाश्च चलितारमात्परम्परा ॥१८७॥
महतीयाण जातिश्चास्थापि श्रीचन्द्रसूरिणा ।
प्रतिबोध्योपदेशेन श्रीमदार्हतशासने ॥१८८॥
भाषायां महतीयाणं मंत्रिदलीयः संस्कृते ।
इत्युलेखः समेत्यस्या जातेर्बाहुल्यतः पुन ॥१८९॥
संस्कृतादिशिलालेख-कथनस्यानुसारतः ।
अस्या उत्पत्तिरत्यन्त-प्राचीनास्ति च तद्यथा ॥१९०॥
श्रीऋषभप्रभोः पुत्र-भरतचक्रवर्त्तिनः ।
श्रीदलमन्त्र्यभून्मुख्यो मन्त्रिगुणसमन्वितः ॥१९१॥
मन्त्रिदलीयनाम्ना तत्सन्ततिरप्यभूज्जने ।
प्रसिद्धा मन्त्रिशब्दस्यापभ्रंशमहताऽजनि ॥१९२॥
अतोऽस्य वंशजानां हि जातिनामापि भूतले ।
महत्तीयाण इत्यासीदुक्तशब्दानुसारतः ॥१९३॥
कियद्भिर्व्यक्तिभिर्यस्य वंशपरम्परागतैः
पूर्वदेशीयतीर्थानां जीर्णोद्धाराणि भूरिशः ॥१९४॥
नूतनचैत्यचैत्यानि, जिनधर्मप्रभावनाम् ।
विधायमहती सेवा कृताप्तशासनस्य च ॥१९५॥
साम्प्रतं पूर्वदेशीय-जैनतीर्थानि सन्ति यत् ।
येषां द्रव्यात्मभोगस्य सुपरिणतिरस्ति हि ॥१९६॥
अस्या जातेः समीचीना संख्यात्रिशतवत्सरात् ।
प्रागभूत् हीयमाना सा, नामशेषाऽधुनाऽभवत् ॥१९७॥
श्रीनाहटागोत्रिभवागरेन्दुसंदब्धभ षामय पुस्तकाच्च ।
दब्धं मया श्रीजिनचन्द्रसूरेरिदं चरित्रं मणिधारकस्य ॥१९८॥
इदं समाप्तं सुगुरु प्रसादात्संवद्गजाङ्काङ्कशशाङ्कवर्षे ।
वैशाखशुक्लस्य तृतीयकायांतिथौ च भौमे पुरिमोहमह्याम् ।'१९९॥
शुद्धे गणे खरतरे मुनिमोहनाख्य-
तच्छिष्यराजमुनितजिनरत्नसूरेः ।
ज्ञानक्रियागुणभृतो लघुबन्धुनोपा-
ध्यायेन लब्धिमुनिना रचितं चरित्रम् ॥२००॥
महेन्द्रसूर्यर्पतिशुद्धदीक्षः श्रीमोहनाख्यः सुमुनिस्ततश्च ।
श्रीमद्यशःसूरिवरस्ततः श्रीजिनर्द्धिसूरीशवरिष्ठराज्ये ॥२०१॥ युग्मम्॥

॥ इति श्रीमणिधारी दादा श्रीजिनचन्द्रसूरीश्वरचरित्रं समाप्तम् ॥ संवत् १९९८ वैशाखशुक्लतृतीयायां मङ्गले स्थानानगरे लब्धिमुनिना ऽलेखीयं प्रतिः इति ॥

[ उपर्युक्त मणिधारी श्री जिनचन्द्रसूरिजी का जीवन चरित्र हमारी 'मणिधारी जिनचन्द्रसूरि' पुस्तक के पद्यबद्ध रूपमें है। इससे २८ वर्ष पूर्व पूज्य उपाध्याय श्री लब्धिमुनिजी महाराज ने सं० १९९० में श्रीरत्नमुनिजी महाराज के सहाय्य से खरतर गच्छ पट्टावली संस्कृत में १७४५ श्लोकों में निर्माण की थी। प्रस्तुत पट्टावली की ७४ पत्र व २०७५ ग्रंथ संख्या वाली उपाध्यायजी महाराज के स्वयं महीदपुर में लिखी हुई प्रति हमारे 'अभय जैन ग्रन्थालय' बीकानेर में है जिसमें मणिधारी जी का जीवनवृत्त श्लोक ९९७ से पद्यांक १०६५ पर्य्यन्त है। प्रस्तुत चरित्र में मणिधारीजी के प्रतिबोधित जाति-गोत्रों का इतिहास भी है। हम अपने 'मणिधारी श्री जिनचन्द्रसूरि' के द्वितीय संस्करण में महाजन वंश मुक्तावली और जैन सम्प्रदाय शिक्षा के आधार से इस विषय में प्रकाशित कर चुके हैं अतः पट्टावली के श्लोक यहां नहीं दिये जा रहे हैं।

—सम्पादक ]

Jain Education International For Private & Personal Use Only www.jainelibrary.org